Shivaproktam Kashimantramahimavarnanam

# शिवप्रोक्तं काशीमन्त्रमहिमावर्णनम्

## Document Information

Text title : Shivaproktam Kashimantramahimavarnanam

File name : shivaproktaMkAshImantramahimAvarNanam.itx

Category : shiva, shivarahasya, mantra, tIrthakShetra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam | 177-196||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# शिवप्रोक्तं काशीमन्त्रमहिमावर्णनम्

(शिवरहस्यान्तर्गते उग्राख्ये)
श्रीशिवः (उवाच)
काशीतिवर्णयुगलं निःसृतं यन्मुखाम्बुजात् ।
तस्य संसारनिगला गलिता एव तत्क्षणे ॥ १७७॥

विवशेनापि काशीति येनैव समुदीरितम् ।
स सद्यः सकलापद्भ्यो मुच्यते नात्र संशयः ॥ १७८॥

काशीति परमं मन्त्रं सर्वमन्त्राधिदैवतम् ।
मुक्तिदं मुनयः सर्वे जपन्त्यनुदिनं मुदा ॥ १७९॥

काशीत्यमृतकल्लोललोलजिह्वा मनीषिणः ।
प्रयान्ति शिवसायुज्यं इज्यादानादिभिर्यमम(र्विना) ॥ १८०॥

काशीति वर्णयुग्मस्य प्रभावं वेद शङ्करः ।
काशीति वर्णद्वन्द्व यद्बहुदुःखापहारकम् ॥ १८१॥

तद्विधूय द्वन्द्वदुःखं शुद्धमद्धा ददाति च ।
काशीत्युच्चरित येन परिहासेन वा यम ।
तेन स्वोपार्जितानन्तपापं नश्यत्यसंशयम् ॥ १८२॥

पापकानननाशाय काशीत्येष हुताशनः ।
परमेशेन निर्दिष्टः शिष्टः कष्टविनाशकृत् ॥ १८३॥

जन्ममृत्युजरादुःखमहारोगौषधं परम् ।
काशीति परमो मन्त्रो सन्त्रासयति पातकम् ॥ १८४॥

संसारपापमत्तेभपञ्चाननमनामयम् ।
संसारगर्तमग्नानां काशीत्येष महामनुः ॥ १८५॥

समाकर्षकरं स्पष्टं सर्वश्रेयस्करं तथा ।

संसारसर्पदष्टेन काशीति मनुमूलिका ॥ १८६॥

संसारविषशान्त्यर्थं सेवनीया मुहुर्मुहुः ।
मुक्तिकान्ताकर्षकोऽयं काशीति मनुरुत्तमः ॥ १८७॥

असकृद्वा सकृद्वापि काशीति मनुमुत्तमम् ।
यो जपेत्स महाघेभ्यः सद्य एव विमुच्यते ॥ १८८॥

यम काशीति वाग्वल्ली सुवर्णद्वन्द्वपल्लवा ।
स्वर्गापवर्गफलदा बलप्रमथनप्रिया ॥ १८९॥

काशी नाम सुधा धन्या वसुधातलवासिनाम् ।
पिबन्ति श्रद्धया सिद्धाः शमनैतां तपोधनाः ॥ १९०॥

काशीति मन्त्रराजोऽयं पुण्यराशिसमृद्धिदः ।
अनन्ताभेद्यविविधपापराशिमहाशनिः ॥ १९१॥

काशीत्वमृतमुत्कृष्टं सुराणामतिदुर्लभम् ।
पिबन्ति साधवो भक्त्या भाललोचनपूजकाः ॥ १९२॥

पीत्वाप्यमृतमाशास्य सुरा भूत्वा पुनर्नराः ।
भवन्ति न तथा काशीनामामृतनिपायिनः ॥ १९३॥

काशीत्येष महामन्त्रः श्रेष्ठोऽयममृतादपि ।
अमृतं नश्वरं यस्मादनश्वरमय मनुः ।
(अमृतं नश्वरं यस्मान्मनुरेष ह्यनश्वरः ।)
एतादृशोऽयं काशीति महामन्त्रोऽमृतात्मकः ॥ १९४॥

काशीति नामोच्चरणं सर्वाङ्गे भूतिधारणम् ।
कस्य वा मरणेऽभ्यर्णे न निर्वाणं प्रयच्छति ॥ १९५॥

काशीप्रयाणं काशीति नाम पीयूषभक्षण(सेवन)म् ।
विभूतिधारणं चेति त्रयं निर्वाणदं न किम् (दायकम्) ॥ १९६॥

॥ इति शिवरहस्यान्तर्गते शिवप्रोक्तं काशीमन्त्रमहिमावर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः २९ शिवगौरीसंवादे काशीप्रभावकथनम् । १७७-१९६ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 29 shivagaurIsaMvAde kAshIprabhAvakathanam . 177-196..

Notes:
Śiva शिव describes about the merits of Varṇayugma वर्णयुग्म that forms the MantraRāja/MahāMantra “Kāśī” मन्त्रराज/महामन्त्र “काशी”.

Proofread by Ruma Dewan

---

*Shivaproktam Kashimantramahimavarnanam*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*